# SAMPLE QUESTION PAPER - 2

अक्कादमिक - संस्कृतविद्यालयानां कृते — अङ्काः 40

समयः 1½घण्डा

**I कोष्ठकात् समुचितमुत्तरं निर्धार्य लिखत -** 2

1. अभित्तौ चित्रकर्म इति पाठभागः कं विषयं सूचयति। (परोपकारं, उद्यमम्, दानशीलम्)
2. ................. न प्रमदितव्यम्। (सत्यात्, सत्येन, सत्यम्)

**I यथोचितं योजयत -** 5

| | |
|---|---|
| कथासरित्सागरः | तपोवनस्वामी |
| जातकमाला। | भवभूतिः |
| मयमतम् | सोमदेवः |
| उत्तररामचरितम् | आर्यशूरः |
| विष्णुयमकम् | मयः |
| | विश्वकर्मा |

**III आयुर्वेदस्य अष्टाङ्गान्यधिकृत्य श्लोकस्याशयानुसारं लघूपन्यासं लिखत -** 5

कायबालग्रहोर्ध्वाङ्गशल्यदंष्ट्राजरावृषान्।
अष्टावङ्गानि तस्याहुश्चिकित्सा येषु संश्रिता।।

**IV श्रद्धात्रयं भगवद्गीतोक्तदिशा विशदयत -** 4

**V वृक्षाणां चिकित्साविधीन् अधिकृत्य टिप्पणीं लिखत -** 3

**VI श्लोकं पठित्वा प्रश्नानामुत्तराणि लिखत -** 1 x 5 = 5

कृतारिषड्वर्गजयेन मानवी-
मगम्यरूपां पदवीं प्रपित्सुना।
विभज्य नक्तंदिवमस्ततन्द्रिणा
वितन्यते तेन नयेन पौरुषम्।।

1. अस्मिन् श्लोके 'तेन' इत्यनेन कः उद्दिष्ठः?
2. तेन कथं पौरुषं वितन्यते।
3. पद्येऽस्मिन् 'अहोरात्रम्' इत्यर्थे प्रयुक्तं पदं किम्?